CC-0. Digitized by eGangotri and MIDF - Delhi

हिमाद्रि-महिमा

(सुरभारती-सुमनोरमं पद्यात्मकं खण्ड-काव्यम्)



रचनाकारः किञ्जल्कः

भैषज्यसदनम्, पोखरा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi





Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हिमाद्रि-महिमा

(सुरभारती-सुमनोरमं पद्यात्मकं खण्ड-काव्यम्)

"स जयति धवलिमधामा शौर्य्यौदार्य-धैर्य्यधुर्य्यो देवः
तमसो मा ज्योतिरिति निर्दिशन् हिमालयो धन्यः"

रचनाकारः

किञ्जल्कः

भैषज्यसदनम्

पोखरा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रचना	–	हिमाद्रि-महिमा
रचनाकारः	–	किञ्जल्कः
भाषा	–	सुरभारती
संस्करणम्	–	प्रथमम्
संख्या	–	१०००
प्रकाशकः	–	अनिल-वैद्यः भैषज्यसदनम्, पोखरा
तिथिः	–	श्रावण-शुक्ल-पूर्णिमा (ऋषितर्पणी) २०६१

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रद्धेया स्व. श्रीलक्ष्मी देवी मल्ल
(वि. सं. १९४५-०७ फाल्गुण २०२१)

समर्पणम्

श्रीमन्मल्लकुलाऽमलोज्ज्वलमणे !
कारुण्यरत्नाकरे !
श्रीलक्ष्मीरितिविश्रुते ! हरिपद-
प्राप्त्यै प्रयत्ने रते !
त्वत्स्नेहाऽम्बुनिषिक्तवर्द्धिततरो-
श्चारु प्रसूनं नवं
सश्रद्धं प्रणमन् समर्पयति ते
"किञ्जल्क" एषोऽनिशम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मङ्गलम्

अभयवरददेवस्तुण्डिलश्चैकदन्तः
सघन-मद-सुगन्धोन्मत्तनीलाऽलिमालः
कमल-मुकुल-वक्त्रो मञ्जुशुण्डाऽञ्चिताऽङ्गः
स जयति नितरां सन्मङ्गलः श्रीगणेशः

विघ्नध्वान्तविनाशाय सर्वाऽभिप्राय-पूर्तये
पार्वती-प्रिय-पुत्राय गणाऽधिपतये नमः

गिरिवरतनुजाश्रीप्रेमसम्पूर्णपुञ्ज !
व्यतिकर-निकरघ्न ! व्यक्त-सिन्दूर-रङ्ग !
सहज-सुभग-सौम्य-स्नेह-सौहार्द-मूर्त !
भवतु सुफलिनी मे भाव-भाषा शुभाऽऽशा

रसभरनतहर्षोल्लास-गम्भीर-गुञ्ज-
नवघनपटलाऽलिव्रातवन्द्योऽधिदेवः !
परिमल-विमली-गोधूलि-लालित्यमाली
व्यपनयतु विबन्धं विघ्नसङ्घातघाती

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अभिमतम्

क्व हिम-महिम-मान्यः शैलराजो विशालः
क्व च तनुवचनाभ्यां स्वल्पकोऽहं वराकः
तदपि च मम यद् दुःसाहसे वा प्रयासे
भवति उत मदीया भाव-भक्तिर्हि हेतुः

शम-समय-समुत्थं मानसं भाव-पद्मं
निचितममर-वाणी-मन्दिरे यत् सभक्ति
विकचयितुमसंख्यं सुप्त-भावं कवित्वं
सुरभि-समनुषङ्गात् प्रेरणादायि तत् स्यात्

न हि नव-नव-भावोन्मेषिणी मे मनीषा
न च परमसुविज्ञत्वं हि साहित्य-शास्त्रे
तदपि मम यदित्थं साहसो वा प्रयासो
ननु भवति कवित्वे केवलं मोहमात्रम्

सरल-सरसभावं संस्कृतं पद्यमेतद्
यदि सहृदयलोकं रञ्जयेल्लेशमात्रम्
धवलशिखरमालालोकनेपालिकोऽहं
सफलमनुभवेयं स्वीय-कर्त्तव्यकत्वम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विद्वद्वराय पूज्यश्री-हरिप्रसादशर्मणे
यथोचितपरामर्श-प्राप्त्यै "किञ्जल्क" एष ते

कृतज्ञतां प्रकटयन् नमस्करोति साऽऽदरम्
पूज्यश्रीशुकदेवाय शर्मणे विदुषेऽपि च

नमस्करोति किञ्जल्कः कृतज्ञत्वं च ज्ञापयन्
काव्य-स्वरूप-सँस्कार- प्रक्रमे रुचिपूर्वकम्

सतीर्थ्य-विदुषोः सुष्ठु प्रयासोऽतिसुखाऽऽवहः
ईश्वराऽनुग्रहात्प्राप्तः सम्पर्कः सुधियोर्द्वयोः

काव्यस्य रूपसज्जायां सयत्नश्च प्रकाशने
भ्राता कनिष्ठ आनन्दो धन्यवादार्ह एव मे

किञ्जल्कः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शुभकामना

पुष्कर (पोखरा)-प्रदेश-निवासिना विद्याविनयसम्पन्नेन श्रीगोपालवैद्य-विदुषा नेपाल्लीभाषायां तत्समच्छन्दस्यनूदितै-र्विष्णुसहस्रनाम - सूक्तिमुक्ताहार-कुमारसंभव (प्रथम, चतुर्थ, पञ्चमसर्ग)- भर्तृहरिनीतिशतक- चाणक्यनीतिदर्पणैः शिवमहिम्नः स्तोत्रेण तथा स्वयं निर्मिताभ्यां देवस्तुतिपरया किञ्जल्क-कणिकया वद्री-केदारदर्शनेन च विद्वत्किञ्जल्कस्य श्रीकिञ्जल्कमहोदयस्य प्रतिभायां पुरः प्रकाश्यमानायां लब्धतन्निर्मित-हिमाद्रिमहिमेतिनामक-प्रकाशोन्मुखाऽभिनवखण्ड-काव्याऽवलोकनाऽवसरस्य मे मनसि प्रसरन्तीममन्दाऽऽ नन्दलहरीमनुभवन् विद्याविषयिकां तत्र भवतो निष्ठां हृदयतः प्रशंसन् सरस्वत्यास्तत्र भवत उपरि करुणादृष्टिरीदृशी यथोत्तरं विकसन्ती स्तादिति शुभं कामये ।

हरिप्रसादशर्मा आचार्यः
२०६१-३-१५
हरिशयनी एकादशी
काष्ठमण्डपः
लोहितसेतुः =रातोपुल
दूरभाषः ४४९३२०४

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

किञ्जल्क-काव्ये मदीया सम्मतिः

पोखरावास्तव्येन वाङ्मयसेविना किञ्जल्कमहाभागेन विरचितं "हिमाद्रि-महिमा" इत्याख्येयं सुललितं संस्कृतखण्डकाव्यं मया व्यलोकि । सरस-सरलशैल्यां विनिर्मितमिदं खण्डकाव्यं प्राकृतिकसुषमावर्णनदृशा भौगोलिकवैशिष्ट्यनिरूपणदृशा च नितान्तं रमणीयं वरीवर्ति ।

संस्कृतभाषा "अमरभाषा" विद्यते । वैदिक कालादारभ्य वर्तमानसमयं यावदस्यां भाषायामगणनीयाः कृतयो विरचिताः सन्ति । नेपालेऽपि संस्कृतभाषायामनेके कवि-लेखकाः काव्यादिनिर्माणे प्रवृत्ता दृश्यन्ते । तत्र "हिमाद्रि-महिमा" इत्यस्य वैशिष्ट्यमवश्यमेव उल्लेखनीयं स्यादिति मदीयो विश्वासः परिस्फुरति ।

किञ्जल्कमहोदयेन इतः पूर्वमपि अनेकाः कृतयो निर्मिताः सन्ति । तासां कृतीनां महत्त्वं विद्वद्भिरनुभूतमेव । विशेषतो भक्ति-साहित्ये नीति-साहित्ये च तदीयं योगदानं वेविद्यत इति मया मन्यते । संस्कृते नेपालीभाषायाञ्च समानरूपेण किञ्जल्क-लेखनी प्रसरतीति महत् सौभाग्यमस्ति ।

२२०श्लोकेषु प्रणीतं प्रस्तुतं खण्डकाव्यं विद्वद्भिः सादरमास्वाद्यत इत्यहं मन्ये । उपजातिवृत्ते कवेः सुदृढोऽधिकारोऽत्र दरीदृश्यते । राष्ट्रियमहत्त्वप्रकाशने सांस्कृतिकगौरवाऽभिव्यञ्जने चाऽत्र कवेर्महती रुचिर्विलोक्यते ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हिमालयस्य संरक्षणेन बहवो लाभा भवन्तीति च सुकवेः किञ्जल्कस्य दृष्टिकोणो लभ्यते । हिमालयभूमिवर्णने कवेरस्य कीदृशी सूक्ष्मा दृष्टिरस्तीति दृष्टान्तोऽत्र निदर्श्यते । यथा-

श्रुतेः स्मृतेः प्रागितिहासभूमिर्ब्रह्मर्षिदेवर्षिमहर्षिभूमिः ।
सज्ज्ञानविज्ञानविचारभूमिर्हिमालयोऽध्यात्मसुचिन्त्यभूमिः ॥
(हिमाद्रिमहिमा श्लोक २१८)

अत्र एकस्मिन्नेव पद्ये हिमालयस्य वैभवं सुस्पष्टं निरूपितं सहृदयहृदयेषु प्रीतिवर्धकं समनुभूयते । पद्येऽत्र वारचतुष्टयं पुनरावृत्तोऽपि भूमिशब्दो विशेषाऽर्थबोधकतया रमणीयतां जनयति ।

एतादृशमहनीयकाव्यकर्ता गोपालवैद्यनामा "किञ्जल्कः" सर्वैः संस्कृतसंकृतिप्रेमिभिः साहित्यसाधकै राष्ट्रभक्तैश्च सहर्षं श्लाघनीयः । सम्प्रति नूतनकाव्यप्रकाशनोपक्रमे तदीयसुखशान्तिनैरुज्यदीर्घायुष्यसम्पादनाय भगवन्तं हृदा निवेदयन् विरमत्येष जनः ।

"किञ्जल्क इव किञ्जल्कः प्रसारयतु सौरभम् ।
तदीयं काव्यसौन्दर्यं सर्वतो विचकास्तु च ॥"

शुभाऽऽकाङ्क्षी
डा. माधव भट्टराई
नायब बडागुरुज्यू
अनामनगरम्, काष्ठमण्डपः
नेपालः ।

दिनाङ्कः २०६१/३/२१

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शुभाऽऽशंसा

अथाऽत्र भवान् किञ्जल्कोपनामकः कविवरो गोपालवैद्यः १९७८तमे वैक्रमाऽब्दे लब्धजनिं'बागलुङ'-मण्डलाऽभिजनोऽपि २०१५वैक्रमाऽब्दतः कास्कीमण्डलीय-पोखरापुरमध्यासीनः समाश्रितभैषज्यसरणिर्जनसेवां कुर्वन् वर्तते। संस्कृतसाहित्यविषये सम्पूर्णमध्यमपरीक्षामुत्तीर्य आयुर्वेदविषयमाश्रित्य सम्प्राप्तोच्चशिक्षः कविवरः किञ्जल्कः कविताकृतौ नैरन्तर्येण प्रवृत्तो दृश्यते। विष्णुसहस्रनामस्तोत्रम्, शिवमहिम्नःस्तोत्रम्, उपमन्युकृतशिवस्तोत्रम्, भर्तृहरेः नीतिशतकम्, चाणक्यनीतिदर्पणः इत्येताः कविताकृतयः नेपालीय-पद्यात्मक-छायाऽनुवादतो रूपान्तरिताः कविवरेणाऽनेन। एवं सुभाषितरत्नभाण्डाऽऽगारादिग्रन्थेभ्यः एकादशशतसंख्याकान् श्लोकान् समुद्धृत्य छायाऽनुवादतो रूपान्तरितान् कृत्वा अत्र भवता संस्कृताऽनभिज्ञा नैपालका बहूपकृताः। कवेः किञ्जल्कस्य "किञ्जल्ककणिका" नामको नानादेवस्तवपरकः पद्यसंग्रहः २०४०तमवैक्रमाब्दे प्रकाशितः। "हिमाद्रि-महिमा" इत्याख्यः काव्य-प्रबन्ध एषः २०२४तमे वैक्रमाब्दे विरचितोऽपि सम्प्रति प्रकाश्यमानो वर्तते।

कवेः प्रथमा मौलिक-कविता कृतिः "किञ्जल्ककणिका" वर्तते, अतः "हिमाद्रि-महिमा" द्वितीयो मौलिकः काव्य-प्रबन्धः इन्द्रवज्रोपेन्द्रवज्रातन्मिश्रोपजातिच्छन्दःसु विरचितो "हिमाद्रि-महिमा" नगाधिराजं हिमालयमेव नायकं समाश्रयन्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

खण्डकाव्यायितः काव्य-प्रबन्धो वर्तते । अत्र २२० पद्येषु काव्यगत-सरसता-माधुर्य-भाषासौष्ठव-परिमार्जितशैली-प्रकृति-चित्रण-प्रावीण्यादिविषयैः काव्यगतोत्कृष्टता दरीदृश्यते । प्रकृतिचित्रणप्रधानेऽपि काव्येऽस्मिन् हिमालयः,तदुत्सङ्गगता नेपाल-भूमिः तत्रत्या जाति-भाषा-धर्म-संस्कृत्यादयः सामाजिक्यो रीतिस्थितिप्रवृत्यादयश्च यथेष्टं काव्याऽऽत्मककलाशैल्याः प्रवर्णिताः सन्ति । सर्वस्या अपि हिमश्रृङ्खलायाः प्रवर्णने उपक्रान्तेऽपि नेपाल-भूसम्बद्ध-हिमश्रृङ्खलास्तत्रत्य-स्वर्गमस्तकप्रभृति-कूटाश्च सविशेषं कविना वर्णिताः सन्ति । सुरभाषायां विरचितेऽपि प्रबन्धेऽस्मिन् यत्र तत्र निस्सङ्कोचं कविरसौ हिमालीयक्षेत्राधिऽवासिनां भोटे-थकाली-शेर्पाप्रभृतीनां वाग्व्यवहारे वर्तमानान् भाषा-भाषिकाशब्दान् प्रयुक्तवान् ।

काव्येऽस्मिन् विश्रुतानां भारविप्रभृतिकवीनां शैली च बहुधाऽवलोक्यते । निदर्शनार्थं यथा-

"सुविस्तृतेयं तुहिनाऽद्रिमाला कादम्बिनीमञ्जुदुकूललोला
जलप्रपातध्वनिगुञ्जिताऽऽशा सरस्तलान्तःप्रतिविम्बिताऽऽभा"

(५५)

क्वचित् कालिदासीया शैली दृश्यते-

"अधो हिमाद्रेर्विमलेन्दुदीप्तेरूर्ध्वं सरिच्छैलवनस्थलस्य
अभ्रं सलीलं विचरद्विभाति प्रोद्धूयमानेव जलौघधारा"

(५४)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नेपाले नानाविधा जातयः संस्कृतयः भाषाश्च सन्ति । एताभिः सर्वाभिरेव सम्पन्ना नेपालभूमिर्वरीयसी गरीयसी चेति मातृभूमिं प्रति भक्तिभावभरितेन कविहृदयेन मर्मस्पर्शि-भावना प्रकटिता यत्र तत्र । निदर्शनमेकम्-

"स्थानीयनाना-जनजातिभाषा-सङ्गीतनृत्याऽभिनयाऽभिनन्द्या,
वैविध्यवत्संस्कृतिभिर्वरेण्या गरीयसी भूमिरियं हि धन्या ।"

(२०६)

अद्यतने कराले कालेऽपि सुरभाषायां रचितामीदृशीं काव्यकृतिं साहित्यप्रणयिभ्यः प्रददत् कविवरः किञ्जल्कः सर्वथासर्वदाऽ स्माकं समादृत्य इत्यत्र न कश्चिद् विवादः । अन्ते चाऽत्र भवते मनीषिणे कविवराय सौहार्दप्रसूतं वाक्प्रसूनं समर्प्य विरन्तुकामोऽस्मि-

गोपालवैद्यविदितं कवि-'किञ्जल्क'-जल्पितम्
काव्यं महीयतां शश्वद् हिमाद्रि-महिमाऽभिधम् ॥

हिमगिरिस्थितिमीक्षितुमिच्छतां
प्रणयिनां स्वजनिक्षितिवासिनाम्
प्रकृतिचित्रणकाव्यमभीप्सतां
कृतिरियं सततं प्रियतामियात् ॥

— डा. टीकारामः पन्थी
प्राज्ञः, नेपाल-राजकीय-प्रज्ञा-प्रतिष्ठानम्

मिति-२०६१/३/२२

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हिमाद्रि-महिमा

असौ महाऽऽकाशविकासचुम्बी
हिमालयो भव्य-वपुर्विशालः
नेपाल-राष्ट्रोज्ज्वलकीर्तिकेतु-
रादर्श आलोकमयो वरेण्यः

१

श्रीशैलजा-शम्भु-निवास-पूज्यः
शान्तः प्रसन्नो धवलोऽभिरामः
सनातनो धीर उदार-धामा
साक्षी पुरा-सम्प्रति-भाविनश्च

२

पुरा किल ज्ञानवतां जनानां
तपःस्थली देवमुनीश्वराणाम्
गन्धर्व-किंपौरुष-यक्ष-भूमि-
र्धन्यो धुरीणो धरणीधरेन्द्रः

३

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रुतिस्मृतिज्ञानविकासमूलं
ब्रह्मर्षिदेवर्षिमहर्षिसेव्यः
सुजीवितस्योत्तरकालयाप्यो
हिमालयोऽध्यात्म-विचार-धाम

४

रसाऽनुभूतिः प्रतिभाऽभ्युपेतः
शब्दाऽर्थयोः सुन्दर-संहतिश्च
कलात्म-भावात्मक-पक्षशाली
प्रबुद्ध-काव्याऽऽभरणो हिमाद्रिः

५

अदम्यसाहस्यसुविक्रमोर्जा
सदा जयोल्लासविमुग्धमुद्रः
अतुल्यसौन्दर्यतुलाऽधिरोहो
धन्यो धरा-धाम-वरो गिरीशः

६

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समीरणाऽऽन्दोलित-देवदारुः
शुभ्राऽभ्रसञ्चार-विशेष-चारुः
हिमानिका-खण्ड-विखण्ड-घोष-
प्रकम्पिताऽऽकाश-धरा-विकासः

७

दुर्जेय-दुर्भेद्य-सुदीर्घ-दुर्गः
प्रभावपूर्णोऽप्रतिम-प्रतापः
विसहचमानाऽऽतपवातवृष्टि-
र्मूर्द्धन्य-धन्यः प्रहरी हिमाद्रिः

८

प्रसन्नतामुज्ज्वलतां महत्तां
निदर्शयन् धैर्य्यमुदार-भावम्
ददन्नवं प्रेरणमुत्सहञ्च
हिमालयो जीवन-दर्शनं नः

९

धृतिप्रसादोन्नति-साहसानां
समष्टिरूपा खलु दिव्यमूर्तिः
सौभाग्य-तारा जन-जीवनस्य
हिमालयो विश्वहितेऽधिसंस्थः

१०

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भेत्तुं महाशून्यपथं किलाऽसौ
समुन्नतस्तिष्ठति शैलराजः
किं वा महाऽऽकाशगवेषणाय
शताऽवधानश्च सुदूरदृष्टिः

११

स्तम्भो हि किंस्विद् द्युतिमान् प्रचण्डो
दिग्भ्रान्तपान्थस्य पथप्रदर्शी
सुदर्शनो दुर्गमदर्शनश्च
धुर्य्यो धरायां धरणी-धराणाम्

१२

सरित्प्रवाहस्य च निर्झरस्य
दिव्यौषधेः पुण्य-सरोवरस्य
देवाऽधिदेवस्य च देवदारोः
श्रीसम्पदो भूमिरसौ हिमाद्रिः

१३

प्रवाह औन्नत्यनिपाततीव्रः
सघोष-धूमायित-शीकरश्च
'अणोरणीयान् महतो महीया-'
नित्यात्मकं तथ्यमिहैव मूर्तम्

१४

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शैलाऽधिराजः खलु विश्वमौलिः
सुशीतल-स्वच्छ-सुनीर-धारात्
अनुर्वरां जर्जरितां धरित्रीं
करोति शाकाऽन्नफलप्रभूताम्
१५
ससप्तकानामिह कौशिकीनां
प्रवाहितानां खलु गण्डकीनाम्
*कर्णालिनीसेतिकशारदानां
समुद्गमस्थानमसौ हिमाद्रिः
१६
नद्यां सघोष-प्रखर-प्रवाह-
सङ्घट्टनोद्भूमित-शीकरिण्याम्
दिवा दिवानाथ-कराऽनुभूतेः
समुत्स्फुरत्यैन्द्र-धनुष्क-रागः
१७
समुल्लसे शैललला म -भाले
प्रलिम्पतस्तैजसमुष्ण-रश्मेः
भवत्यलं भास्कर-नाम सार्थं
गुणो गुणिन्येव समृद्धिमेति
१८

---

* सेतीमहाकालिकशारदानाम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सत्यं शिवं सुन्दरमात्मवन्न
स्वरूपमन्यत्र सुलभ्यमीदृक्
तेजोमयं दर्शनमात्रमस्य
निर्वेदनं दार्शनिकं विधत्ते

१९

सदाऽनवद्या हृदयाऽभिनन्द्या
नूत्नैव नित्यं प्रतिभाति शोभा
भूयोऽवलोक्याऽपि न तुष्टि-पुष्टि-
र्लोकोत्तरोल्लास इलाधरेशः

२०

नवारुणीराजिलसल्ललाटो
विलम्बितश्वेत-दुकूलशोभः
सुशृङ्खलः श्रीविभव-प्रदीप्तो
नागाऽधिपो वाऽथ नगाऽधिपो वा

२१

तप्ताऽऽयसद्रावनिभप्रतप्तो
भाव्यन्धकं तर्जयतीव रोषः
सोऽपूर्वसम्मोहनमातनोति
दोषोऽप्यदोषो महतां हि लोके

२२

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सन्ध्या-सुलज्जाऽरुणिमाऽनुरक्तो
भावाऽभिमुग्धो हिमशेखरः किम् ?
दिवा-निशा-सङ्गम-राग-विम्बो
हिमालये वा प्रतिविम्बितः किम् ?

२३

प्रायः सषट्कोणकणात्मकत्व-
मेकाऽधिकाऽऽकारविभेदवत्त्वम्
कार्पास-संकाश-निपात-रम्यं
हिमं मनोहारि च दर्शनीयम्

२४

शिवत्वमाश्चर्यमिदं विशुद्धं
शुक्लत्वमच्छप्रतिमूर्तिमत्त्वम्
सौम्यं यशस्त्वं परिपुञ्जितत्व-
महो !!! महत्त्वं महतां हि नूनम्

२५

अत्यद्भुतं नृत्यमनौपमेयं
सङ्गीतमानन्दि समूर्च्छनं च
अनादितः सम्प्रभवत्यजस्रं
हिमालयात् सत्यशिवाऽभिरामात्

२६

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

'अस्त्युत्तरस्यां दिशि देवताऽऽत्मे-'
त्युद्बोधनाऽऽगुञ्जनमञ्जु-गानैः
साहित्यसाँस्कृत्यकलाः समस्ताः
प्रभाविताः सन्ति सदाऽस्मदीयाः

२७

निशामये नीरदनीरसिक्त-
तुषारशोभामतुलां निशान्ते
पर्य्याकिरन् राजत एव देवः
प्रफुल्ल-निष्कल्मष-पुण्य-पुञ्जः

२८

वर्षाऽवसानाऽवसरे हिमाद्रौ
विशालमेघाऽऽवरणाद् विमुक्तम्
प्राभातिकं स्वर्णिम-रश्मिजाल-
मनौपमेयं तनुते च दृश्यम्

२९

शनैः शनैरावरणं घनस्य
निरेति सुस्पष्टमुदेति तथ्यम्
यथाऽन्धमज्ञानमलं विलीय
ज्योतिर्मयं ज्ञानमुदेति सौम्यम्

३०

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

छटाऽरुणाऽऽच्छन्नगिरेरधस्ताद्
दुकूलमान्ध्यं विततं सुसूक्ष्मम्
रेखाऽभिसंव्यञ्जित-शैलमालं
प्रात्यूषिकं दृश्यमहो !!! विचित्रम्

३१

भूमण्डले द्वित्रितयांऽशिनोऽब्धे-
र्नीरस्य चाऽऽर्द्रस्य सुरक्षमूला
सदैव सम्पूर्ण-विशाल-राशि-
र्धन्या सुसूक्ष्माऽग्रगतिर्हिमानी

३२

नतोन्नताऽऽयामसमप्रचूडै-
र्धराधराणामधिपो विराट् च
सामादिभेदैः किल राजनीतेः
सुस्पष्टमुद्बोधयति स्वरूपम्

३३

नभः प्रसन्नं विकचाश्च तारा
आनन्द-विन्दुः परिपूर्ण इन्दुः
ज्योत्स्नाऽभिषिक्ता धवलाऽद्रिमाला
वरीयसी भावमयी त्रियामा

३४

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

घोरेऽन्धकारे किमु दिव्यदीप्ति-
रालोकमाला विपुलाऽलका वा
स्वर्गाङ्ग-तारङ्ग-तरङ्गिता वा
रत्नाकरोत्तुङ्ग-तरङ्गिका वा

३५

शनैः शनैः सम्परिदर्शनीयं
शनैः शनैश्चाऽप्यधिरोहणीयम्
शनैः शनैः संस्मरणीयमेव
हिमाञ्चलं प्राञ्जलनैर्वृतिक्यम्

३६

गम्भीरता तोयनिधेर्महत्ता
प्रचण्डता व्योममणेर्महत्ता
विशुद्धिमत्त्वं पयसां महत्ता
समुन्नतिः शैलपतेर्महत्ता

३७

सुदूरविस्तीर्णहरिन्मयाऽऽभा
कडङ्गरीयैः ससुखं च चर्य्या
श्वानस्वनोद्बोधितगोष्ठशाला
दृश्याऽभिरामा मृदु-शष्प-भूमिः

३८

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दिव्यौषधीमूल-तृणं निषेव्य
चरन्ति साऽऽनन्दममूश्चमर्यः
सम्बीजयन्त्यः स्फुट-पुच्छ-गुच्छं
राज्ञो हिमाद्रेर्ननु चाऽनुचर्यः

३९

वेदः सदा गायति पुण्य-गाथां
लोकोऽपि विज्ञापयति प्रतिष्ठाम्
शास्त्रं समाख्यापयति प्रशस्तिं
महामहिम्नोऽस्य हिमालयस्य

४०

दूरान्मनोमोहनमस्य रूपं
समीपतोऽस्याऽतिसुदुस्सहञ्च
भीमं तथा कारुणिकं स्वरूपं
दधान ईशान इवैव भाति

४१

कस्तूरिकावाससुवाससौम्यो
मेषीय-'नाहूर'-समूह-रम्यः
विहङ्ग-'डाँफे'-नवरङ्गिताङ्गो
हिमालयो दुर्लभजीवधानी

४२

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कस्तूरिकाऽऽमोदमुपाहरन्ती
मुदा भ्रमन्ती समुपाचरन्ती
शैलाऽऽधिराजस्य सुतोषणाय
निर्धूम-धूपत्वमुपैति किन्नु
४३

गुराँस-पुष्प-स्मितराग-रक्त-
परिस्फुरन्ती नव-काननश्रीः
हिमालये सानति सादरं च
विज्ञापयन्त्यस्त्यभिनन्दनं किम्
४४

किंस्विद् विहङ्गो नवरङ्ग-डाँफे
शक्राऽऽयुधीं कान्तिमभिस्फुरन्खे
कलात्मकं चाऽभिनयं प्रदर्श्याऽ
भूदादिमो लोककलाऽभिनेता
४५

यन्मोहनालः खलु मोहमूलः
सुकर्बुराङ्गः सुभगो विहङ्गः
हिमालयोपान्तिकजीवनस्य
*सुस्वास्थ्य-सौन्दर्यवर-प्रतीकः
४६

---

* सुस्वास्थ्यसौन्दर्यकसुप्रतीकः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग्रीष्मे तथा प्रावृषि हैममुक्तं
स्थानं चरन्मेष-समूह-पूरः
हिमानिका-भावमुपैति रम्यं
स्वभावमन्वेति कृतिर्हि नूनम्

४७

हिरण्मयं यद्धिमशैलशृङ्गं
सरोहितं रोहितकं प्रफुल्लम्
सुविस्तृतं पुष्पित-शष्पलास्यं
प्रसाधनं तत् प्रकृतेर्विचित्रम्

४८

हरिन्मणित्विण्मयहैमचारु-
स्वरूपसौरभ्यवरिष्ठदारुः
समुन्नतः शैलशिखाऽनुकल्पो
महीरुहेन्द्रो ननु देवदारुः

४९

नेत्र्यं मनोहारि सुगन्धपूर्णं
स्वास्थ्याऽऽयुरानन्दविवर्द्धनं च
शिवा-शिवाऽऽराधनसंस्थलीयं
देवद्रुमीयं विपिनं वरेण्यम्

५०

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गरीयसो वैभविनां गुरुत्वा-
न्महीयसः कीर्तिमतां महत्त्वात्
प्रशस्तिपत्रं तुहिनाञ्चलस्य
संवेष्ठच सन्तिष्ठति भूर्जपत्रः

५१

प्राचीन-शैलेय-रसायनीयं
कादम्बिनी-सान्द्र-सुनील-लेखम्
शिलाजतु व्यक्तयशोऽभिनन्द्यं
शिलाऽभिलेख्यं ननु शैलमौलेः

५२

उपत्यका पर्वतराजिशोभा
विराजते काननशाद्वलश्रीः
क्वचिद् गिरिग्रावसमूहभीमा
क्वचिन्नदी निर्मल-नीर-धारा

५३

अधो हिमाद्रेर्विमलेन्दुदीप्ते-
रूर्ध्व सरिच्छैलवनस्थलस्य
अभ्रं सलीलं विचरद् विभाति
प्रोद्धूयमानेव जलौघधारा

५४

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सुविस्तृतेयं तुहिनाद्रिमाला
कादम्बिनी-मञ्जु-दुकूल-लोला
जल-प्रपातध्वनि-गुञ्जिताऽऽशा
सरस्तलाऽऽन्तःप्रतिविम्बिताऽऽभा

५५

दूरं विशालं हिमशैलशृङ्गं
सरोवरे निर्मल-शान्त-नीरे
छायापथेनैति यथा परोक्षाऽ
भिव्यक्तिरन्तःकरणे विशुद्धे

५६

भूमौ मृदुश्यामलमञ्जुशष्पं
शष्पेऽनुसक्तः स्फुटशीत-विन्दुः
विभाति विन्दौ प्रतिविम्बितं यत्
सांसारिकं प्रस्तुत-वस्तु-चित्रम्

५७

विमुग्धता हैमगिरेः समन्ताद्
विशुद्धताऽऽव्याप्ति विमुग्धतायाम्
हेतुर्विशुद्धिर्हि सुजीवनस्य
सुनिर्मलत्वे च समुन्नतित्वे

५८

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सरित्सरोनिर्झरशाद्वलैश्च
शैलैस्तुषाराक्तशिखैररण्यैः
उपत्यका धान्यफलैश्च धन्या
स्वस्यां स्वयम्पूर्णमती धरित्री

५९

उपत्यका भारतभूमिभागा
काश्मीर-भू-'स्वर्ग' इति प्रसिद्धा
तथा च नेपालिकपोखराऽपि
विराजतेऽविस्मरणीय-शोभा

६०

आहैमरेखं सघनं वनं च
केदारकं श्रेणिनिबद्ध-रम्यम्
शान्तश्च पन्था विरलश्च घोषः
सरित् सकल्लोलगतिश्चकास्ति

६१

सुशोभते यत्र विहारगुम्बा
लामा झुमा तोरणमुत्पताका
'मानी पिमे हुं' मणिपद्मयन्त्रं
मन्त्रध्वनिर्वाद्यमखण्डदीपः

६२

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विराजते मुक्तिदमुक्तिनाथो
दामोदरो यत्र ह्रदः पवित्रः
गोसाइँतीर्थं विशदं सरश्च
रारा-तिरी-रिग्म-मनोऽभिरामम्
६३

हिमानिकाप्रस्खलनप्रखण्ड-
तरत्तरङ्गाऽन्तर-राजहंसम्
सरोवरं नीलगिरेः समक्षं
निगूढ-सौन्दर्यमहो !!! 'तिरीछो'
६४

श्रमी विनीतः सरलो बलिष्ठ
आतिथ्यशीलो मधुराऽभिभाषी
और्णेयशिल्पेष्वधिकप्रवीणो
धन्यस्तुषाराऽञ्चलिको हि लोकः
६५

सेर्पाऽऽदिनानाजनजातिकानां
निवासभूमौ निजकर्म-भूमौ
औन्मुक्तिकौन्नत्यमहत्त्वदृष्टिः
*सेर्पोपमेया हि सदैव शौर्ये
६६

---

* सेर्पा सदोदाहरणं हि शौर्ये

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

युगे हि वैज्ञानिक-भौतिकेऽस्मि-
नाहैमवद् दुर्गममब्धिकूलात्
मार्गः समुत्सर्पति सर्पभङ्गी
रात्रिन्दिवं यान्त्रिकयानवाही

६७

अजाऽश्वभ्कोपाखरचामरिण्यो
भाराऽऽवहाऽऽकर्षकपंक्तिबद्धाः
सञ्चालकाऽऽलापमनोऽभिराम-
घण्टारवाऽऽक्रान्तपथाः प्रयान्ति

६८

फाण्टं 'चिया' पिप्पलपत्रजातं
निर्मन्थितं वेणुमये च पात्रे
सलावणाऽऽज्यं यवपिष्टमिश्रं
दैनन्दिनं सार्वजनीयपेयम्

६९

आषामदोर्जीलिङपर्वतीये
भागेऽस्ति रम्योपवनं चियायाः
छायाप्रशुष्का कलिका च नूत्ना
पेये प्रयोज्या खलु फाण्टरूपा

७०

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कादम्बरीनिर्मलरागरम्यं
कलात्मकृत्यङ्कितहैमरौप्यम्
पीठाऽधिसंस्थं चषकं सुकान्त-
मालोकयन्को नु न मोदतेऽत्र

७१

निरम्बु सान्द्रं चमरीयतक्रं
साऽऽपीडमाधानमतः प्रशुष्कम्
सुस्वादु वैदूर्यनिभं सुचर्व्यं
"छुर्पे" चियायोगि च चूर्णरूपम्

७२

द्रावं सुसन्धानयवान्नजन्यं-
"छ्वाङ्" स्वादु सर्वाधिकसौमनस्यम्
विवाहनृत्योत्सवसङ्गमेषु
तत् स्नेहसम्मानजनीयपेयम्

७३

विभिन्नदेशी च विभिन्नभाषी
शैलाऽधिरोही परिदर्शनार्थी
संयाति हर्षोल्लसितो विमुग्धो
निरीक्ष्य रम्यां गिरिराजराजिम्

७४

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मित्रैः सहाऽऽप्तैः परिदर्शनार्थी
प्रतिच्छविग्राहकयन्त्रयोगी
समङ्क्ष्य चित्रं बहुशो हिमाद्रे-
स्तृप्तिं यथेष्टां न कदाप्युपैति

७५

विशेषसंसाधनपादहस्तो
हिमाऽऽवृतश्लक्ष्णभुवि प्रमोदी
क्रीडात्मकप्रस्खलनैः समित्रः
सन्तोषमत्यन्तमुपैति लोकः

७६

साऽऽयासमारुहच गिरिप्रपातं
झरप्रवाहाऽनुसरत्सरज्जु
क्रमादधः प्रस्खलनं तथाऽन्ते
ह्रदे गभीरे प्लवनं समोदम्

७७

प्राणान् सशङ्काऽऽस्पदतां निधाय
प्रदर्शयन् साहसपूर्णकार्यम्
नृणां मनो रञ्जयति स्वयं च
प्रकाममानन्दमुपैत्यमेयम्

७८

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कूलू-मसूरी-सिमला-मनाली-
भुवालि-दोर्जीलिङ-नैनितालम्
सुस्वास्थ्यपर्यावरणोपयुक्तं
विलासिभिः पर्यटकैश्च धन्यम्

७९

विद्योतते दूरत एव विद्यु-
न्माला मनोमोहकरी निशायाम्
दृश्याऽऽतिरम्या गनहीलतश्च
पूरी मसूरी परिदर्शकानाम्

८०

भीमे हिमागारचये प्रपाते
प्राणान् सशङ्कास्पदतां निधाय
आरोहिणां कौशलिनां तु शैलाऽ
धिरोहशैली सुभगाऽपि दुर्गा

८१

अस्त्यद्रिराजे विपुलञ्च शून्यं,
भीम-प्रपातो, विवरं गभीरम्,
संकीर्णमद्रयन्तरमन्तरालं,
वात्याऽतितीव्रा, गहना हिमानी

८२

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तथाऽप्यहो स्विद्धिमशैलराज
आरोहिणां साहसिनां हृदब्जे
सम्मोहनी भूय विराजमानोऽ
नुभूतिवेद्यं सुखमातनोति

८३

प्रत्यब्दमागत्य नगाऽधिरोही
संस्थाप्य यातो भुवि कीर्तिमत्त्वम्
शौर्यस्य धैर्यस्य यशस्वितायां
हिमालयोऽसौ किल मानदण्डः

८४

सदा हिमाऽऽच्छन्नगिरीन्द्रशृङ्गे
नानाव्यतीपातनिपातमध्ये
पदाऽर्पणं साहसिकं नराणां
महोपलब्धिर्हि महीतलीया

८५

विदेशिनां पर्यटनप्रियाणां
निर्बाधमाकर्षणमद्रिकेन्द्रम्
वैदेश्यमुद्राजननप्रमुख्यं
स्रोतो हि कौबेरनिधेर्निधानम्

८६

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वराष्ट्रवित्तीयसमृद्धिमूल-
स्रोतोऽधुना पर्यटनोद्यमोऽस्ति
हितेऽस्मदीये वरदोऽत्र शैलाऽ
धिपात्मको श्रीनिधिराविरासीत्

८७

अजस्रधारा सरिताऽतितीव्रा
प्रवाहिता यद् धवलाद्रिमौलेः
उद्योगवाणिज्यविकासशीले
लोके हि तन्नो वरदानमेव

८८

तुङ्गः 'सगर्माथ' उदभ्रचूडो
लोत्सेऽन्नपूर्णो धवलो गिरिश्च
नीलो गिरिः काञ्चनजङ्घनाऽऽख्यः
कूटः प्रसिद्धो हि हिमालयस्य

८९

प्रतीच्युदीच्योरतिशोभमाना
नन्दाऽभिधा शैललालममाला
नेपालनद्यः प्रभवन्ति यस्याः
कर्णालिकीसेतिकशारदाद्याः

९०

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मध्ये महालङ्गुरशैलराजे-
र्लोके 'सगर्माथ' इति प्रसिद्धः
सर्वोच्चतामेत्य यशस्वितायां
स्वर्मस्तकोऽभूद् भुवि नाम-सार्थः
९१

प्रातारवेराद्यविभाऽभिषिक्तो-
रहस्यमूलं यतिपादचिन्हैः
पूज्याऽऽर्यकीर्तिस्फुटशुभ्रभालः
स्वर्मस्तको विश्वविशालचूलः
९२

श्रीमुक्तिनारायणपुण्यभूमौ
श्रीगण्डकीधौतनिवेशधन्यः
धौलागिरिर्यो धवलो गिरीशः
कैलासकूटाऽनुकृतिर्विभाति
९३

मध्येऽन्नपूर्णाहिममालिकाया
यन्मत्स्यपुच्छ्रं शिखरं सुरम्यम्
उपत्यकां शस्यसरःसुनीलां
श्रीपोखरां नित्यमलङ्करोति
९४

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विभावसोः काञ्चनकल्पकान्तिं
सदैव सर्वाऽधिकतां दधाना
सिक्कीम-नेपाल-विभक्ति-रेखा
विराजते काञ्चनजङ्घमाला

९५

यः कुम्भकर्णाख्यहिमाद्रिमाला-
समुत्थितोऽदम्यमकालुकूटः
नेपालपूर्वोत्तरभागशोभी
समुन्नतौ कीर्तिमतां तृतीयः

९६

रोल्वालिङो हैमगिरेः प्ररूढं
गौरीश्वराऽऽख्यं युगलं च शृङ्गम्
नेपालपूर्वोत्तरभागधेयं
विराजते नित्यमनौपमेयम्

९७

यल्लामटाङ्गाद्रिततेः समुत्थं
गोस्वामिशृङ्गं सविशेषपूज्यम्
सरः सुनीलं शिवमच्छतोयं
गोस्वामितीर्थं खलु दर्शनीयम्

९८

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नदीतटीव्यक्तनिसर्गरेखा
दर्रेति घाँटीति भुवि प्रसिद्धाः
नेपालतिब्बद्गमनाऽऽगमाय
हिमाद्रिमालान्तरिका हि मार्गाः
९९

नक्पावलाङ्चुङ्हटियारसूवाः
मुस्ताङलार्केकुतिताक्लखाराः
सन्त्येषु केचिद् मधुकाद्धि केचि-
*दावत्सरं सञ्चरणाय योग्याः
१००

पाश्चात्त्यकाश्मीरभुवं विभूष्य
पौरस्त्यवङ्गोपसमुद्रमेत्य
विराजते भारत-भूतलेऽपि
हिमालयो विश्व-हितेऽधिरूढः
१०१

प्राकारिकाऽऽकारसमुन्नतोत्था
वराऽभये सन्दधती विशुद्धा
विराजते पर्वतराजराजिः
प्रगाढमैत्रीकरमालिकेव
१०२

---

* दाव्रत्सरं सञ्चरणोपयुक्ताः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यद्यप्यसाम्यं खलु राजनीत्या
साम्यं पुनः संस्कृतिधर्म्मदृष्टचा
भौगोलिकैतिहचदृशाऽपि साम्यं
राष्ट्रद्वयं सूत्रयते नगेन्द्रः
१०३

बृहत्समादर्शसमुल्लसद्भि-
र्दिव्यौषधीजीवखनिप्रभूतैः
आर्येतिवृत्तैः सुभगा गिरीशै-
र्भूर्भारती पाशुपती च धन्या
१०४

त्रिशूलनन्दागिरिनीलकण्ठं
केदारकं चाऽमरनाथकञ्च
गङ्गोत्तरीयं यमुनोत्तरीयं
शृङ्गं सतीर्थं सविशेषपूज्यम्
१०५

सन्देशमादाय नगाऽधिपस्य
सन्तर्पयन्त्यो भुवि दिग्दिगन्तम्
नद्यश्च गङ्गाप्रमुखाः प्रसिद्धा
विश्रान्तिमायान्ति महार्णवेऽन्ते
१०६

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गङ्गा गुहाऽभ्यन्तरतो विमुक्ता
धाराप्रपाताङ्कितशुभ्ररेखा
मन्द्रस्वना शैलवनाऽन्तराले
प्रतिध्वनिं सन्ततमातनोति
१०७

श्रीचन्द्रमौलिप्रविमुक्तधारा
सुनादिनी मोदमयी सुहासा
गङ्गा भुजङ्गाङ्गतरङ्गभङ्गा
जयत्यजस्रं जगति प्रफुल्ला
१०८

कालिन्दहैमाद्रिनिसर्गमूलः
प्रवाहसङ्घातनिघोषगुञ्जः
सुश्यामलोत्तालतरङ्गिताऽङ्गो
जयत्यलं यामुननीरपूरः
१०९

कैलासशैलाऽऽवलिकाऽलकाश्रीः
सरोवरं मानसमच्छनीरम्
श्रीब्रह्मपुत्रो नद इन्दु-सिन्धु-
स्त्रयं हि तापत्रिनिवृत्तिधाम
११०

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मध्यैसियामध्यमणिप्रदीप्तं
जैवीयभूभौतिकतथ्यगूढम्
विश्वच्छदत्वेन च विश्वविख्यं
पामीरमुच्छ्रायि सुमेरुकल्पम्
१११

पामीरविस्तारविशालशाखः
क्रोशैः ससप्तार्द्धशतैः सुदीर्घः
शतैः सपादैर्विततस्तथोच्चै-
र्हिमालयो विश्व-यशोधनश्च
११२

मध्यैसियासोल्लसशुभ्रकीर्तिः
कृपाणिकाऽऽकारनिवेशशोभी
औदीच्यवात्याप्रतिरोधशाली
हिमालयो नः प्रतिरक्ष-देवः
११३

गाङ्गेयकैर्यामुनकैः प्रवाह-
स्थलैः समैर्मण्डित उर्व्वरैश्च
आब्रह्मपुत्रं विततश्च सिन्धोः
सुभिक्षमूलो विपुलोऽद्रिराजः
११४

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अफ्गानतिब्बन्नवचीनवर्मा-
सिक्कीमभूटानिकपाकदेशी
अनेकधर्म्मी जनजातिभाषा-
भूषी निविष्ठोऽस्ति हिमालयाङ्के
११५

प्रतीच्युदीच्यीयहिमाद्रिशाखा
माला सुलेमानिकनामधेयाः
आपारसाब्धिं विततांश्च दर्रै-
तिहासिकीबोलनखैबराद्याः
११६

शृङ्गं कराकोरमशृङ्खलीयं
गाड्वीनयास्टिन्निति नामधेयम्
काश्मीरचीनीयतुरस्कसीम
समुन्नतौ कीर्तिमतां द्वितीयम्
११७

जान्स्कर्हिमश्रेणिसमाधिरूढं
कामेतशृङ्गं कमनीयकण्ठम्
दास्जान्सनद्युद्गमसंस्थलीयं
साल्किङ्गिरीमार्गमहत्त्वपूर्णम्
११८

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रेणी कराकोरमजास्करान्त-
र्लद्दाखिका लेहिकराजधानी
त्रिशूलकार्गीलकराजमार्गैः
सम्बन्धिताऽन्याऽन्यविशालराष्ट्रैः
११९

संकीर्णगम्भीरतमप्रवाह-
स्थलं हि सिन्धोर्गिलगीतसङ्गम्
लामा-भुमा-बौद्धमत-प्रधान-
मातिथ्यशीलोऽत्र परिश्रमी जनः
१२०

प्राच्युत्तरीया हिमशैलशाखा
पत्रक्रमाऽऽकारवितानमाला
नागा-लुसाई-पटकोइ-पङ्क्ति-
राषामवर्मा-सुविभक्ति-रेखा
१२१

आषाममध्योन्नतसंस्थलेऽस्ति
गारो तथा खासिजयन्तिकाद्रिः
चेरापुँजी भूरि सुवृष्टिभूमि-
र्गौहाटिराषामिकराजधानी
१२२

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समेत्यतो दक्षिणमब्धिकूल-
मिरावती-शाल्बिन-सिक्त-पृष्ठम्
मूर्द्धन्य-पर्जन्य-वनं च पेग्वा-
राकान-योमा-गिरिशृङ्खलं च
१२३
सैवाद्रिमाला विततता सुदीर्घा
यत्राऽस्ति सिन्धुर्व्यवधानमात्रम्
द्विपान्तरा दक्षिणपूर्वराष्ट्र-
जावासुमात्रान्तसमाश्रिता च
१२४
हिन्दूकुशाल्बुर्जसुदीर्घशाखा
किथर्सुलेमानिकलैग्रुसैश्च
अर्मेनियन्केन्द्रकमद्रिमेत्य
पठारमीरानि विराजतेऽन्तः
१२५
तुरस्ककृष्णाऽब्ध्यनुसारि पोन्टास्
भूमध्यतोयोनिधिटौरसाभ्याम्
आर्मेनियन्केन्द्रकमद्रिमेत्य
पठारमानातुलि शोभतेन्तः
१२६

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कास्पीयनाब्धेर्व्यवधानमत्र
ककेशशैलेन हि वस्तुतोऽसौ
यूरोपभूभागमपि प्रपन्नो
हिमालयो विश्वविशालमालः
१२७
प्रतीच्युदीच्योः प्रसृताश्च शाखाः
पामीरग्रन्थेर्बहुशोऽद्रिमालाः
हिसारकस्ट्रान्सयलायलायः
सुसीमिता रूसतुरस्कभूमौ
१२८
पामीरपौर्वात्यविशालशाखा
कुन्लूनमाला टिसलीनमेति
तस्याः प्रशाखाऽऽस्टिनटेगमाला
तथैव नान्सानकमभ्युपैति
१२९
पामीरपूर्वोत्तरदीर्घशाखा
थ्यान्सानमाला विपुलाऽभिरामा
सिक्याङरूसप्रविभक्तिरेखा
चीनप्रदेशे सपिसानमाला
१३०

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कुन्लूनकाराकुरमान्तरीयाऽ
त्युच्चैः समा विश्वयशस्विनी भूः
'तिब्बत्'-त्रिवृन्नस्ति च राजधानी
ल्हासाऽत्र पोटालविशालशोभा

१३१

अल्टाइशाखा खलु कुन्लुनस्य
तस्यास्तथा कुन्लुनपर्वतस्य
मध्ये टिसीडेमिति पङ्किला भू-
श्चीनप्रदेशान्तरसङ्गता भूः

१३२

आस्टीनटेक्कुन्लुनथेनशान-
मध्येऽस्ति तामीरमरुस्थलं यत्
ऐतिहचकं जीवविकासतथ्यं
निगूढमित्यत्र मतं स्टिनस्य

१३३

औदीच्यमङ्गारकभूमिखण्डं
प्रागैतिकप्रास्तरिकस्तरीयम्
तथैवगोड्वानि सुदक्षिणीयं
तुरस्कि पारस्कि च भारतीयम्

१३४

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शनैः शनैः संह्रसनैश्च गाधो,
मध्ये तयोर्टेथिससागरोऽभूत्
भूमध्यकाब्धेस्तत आप्रशान्तं
पुरा मिसोजोयुकिनामकल्पे
१३५

टर्सीनियन्कल्पिकभूतलीय-
निर्मन्थनेनैव सुधेन्दिरेन्दुः
प्रादुर्बभूवाऽत्र विशालमालो
हिमालयो लोक-हिताय देवः
१३६

तथैव-चान्यानि बहूनि सन्ति
पाश्चात्त्यभूतत्त्वविदां मतानि
प्रागैतिवृत्तीययुगाऽनुगीये
हिमालयोत्पत्तिकथा-प्रसङ्गे
१३७

मानाजलप्सीपकीमार्कसङ्गा-
श्चोलाकराकोरमनाथुलाश्च
मार्गा अनेके गमनाऽऽगमाय
सन्ति त्रिवृद्-भारत-सङ्गमायाः
१३८

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हिस्पार्चोमोलुङ्गमबालटोरो-
जेमूवियाफोबतुरोरुपालाः
गङ्गोत्तरीमीलनशोणपानी-
केदारकाः सन्ति महाहिमान्यः

१३९

या मानसूनी जलदात्मवात्या
पारस्कवङ्गोदधिकोद्गता सा
यदैति शैत्यं तुहिनाञ्चलीयं
भवेत् तदाऽऽरम्भ ऋतोर्घनस्य

१४०

नित्यं हिमानीसरणीसुहास
आश्चर्यभूमिर्यतिनां सुगूढा
स्थितो विसहचाऽऽतपवातवर्षा
मूर्द्धन्य-धन्यः प्रहरी हिमाद्रिः

१४१

ज्योतिर्मयी या हिममौलिमाला
समङ्किता हृत्पटलेऽक्षियन्त्रात्
अहो !!! स्मयःसाऽतिमनोऽभिरामा
नैतिच्छविः सा विकृतिं कदाऽपि

१४२

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सुसेचनं स्यात् कृषियोग्यभूमे-
र्वन्यानिरोधो, जलविद्युदाप्तिः,
मत्स्याभिवृद्धिः, सलिलं सुपेयं,
जलीयमार्गप्रसरश्च बन्धात्

१४३

प्रोटिन्भिटामिन्युतखाद्यपूर्त्यै
प्रधानतो मत्स्य-विकास एकः
क्रमप्रवृद्धस्य जनस्य खाद्याऽऽ
पूर्तिर्हि मुख्याऽऽधुनिकी समस्या

१४४

भौतिक्यसंसाधनतो नदीनां
नियन्त्रणं "बन्ध" इति प्रसिद्धः
पराक्रमोऽसौ ननु मानवानां
मूर्तः कलाकौशलशक्तियोगः

१४५

बन्धः सदाऽऽकर्षणकेन्द्र एक-
स्तथाप्यनेकाऽर्थफलप्रदश्च
प्रणम्यमेवाऽऽधुनिकं हि तीर्थ-
मित्युक्तिरादर्शजवाहरस्य

१४६

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बन्धस्तु कोशीपरियोजनीय-
स्तथैव गण्डक्यनियोजनीयः
नेपालिकानां सह भारतीयैः
सौजन्यसन्मैत्र्यकभावबन्धः
१४७

सत्लूजधाराविनियन्त्रणेन
विशालगोविन्दसरोऽभिरामः
षट्लक्ष की.वाऽऽत्मकशक्तिशाली
बन्धो द्वितीयो भुवि भाखडाख्यः
१४८

सदा हिमश्री-शुभ-शुभ्र-शृङ्गो
दर्रा-गुहा-हैम-निकायकायः
विशालशैलाऽऽवलिकाऽऽलयो यो
हिमालयस्तुङ्गशिखः प्रसिद्धः
१४९

हिमालयस्य त्रिविधो विभेदो
महाँल्लघुश्चोपहिमालयाद्रिः
स्वर्मस्तकः काञ्चनजङ्घनाद्रि-
रुत्तुङ्गकूटोऽस्ति महाहिमाद्रौ
१५०

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ख्यातं महाभारतशैलनाम्ना
नेपाल-राष्ट्रस्य गिरि-प्रखण्डम्
तथैव दोर्जीलिङ-नैनिताल-
मसूरिकञ्चाऽपि लघौ हिमाद्रौ
१५१

विशुद्धपर्यावरणे श्वसन् यो
मग्नो हिमश्री-सुखदर्शनाय
नूत्नाऽतिनूत्नाऽनुभवं विचिन्वन्
स एव लोके खलु धन्यभाग्यः
१५२

शिवालिकः पश्चिमभारते यो
द्वारं तथा पौर्विकभारते सः
'चुरे' हि नेपाल तराईके च
मालामयश्चोपहिमालयोऽत्र
१५३

सहस्रकाद् द्वादशकाच्च फूटा-
न्निम्नो हरिज्जङ्गलमङ्गलश्रीः
तुषारशृङ्गो शिशिरे हिमे च
लघुर्हिमाद्रिः परमोऽभिरामः
१५४

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सहस्रपञ्चात्मक-फूटतोधः
सखड्गभल्लूकवराहनागः
सशिंशिपाशालपलाशघासः
सुमङ्गलश्चोपहिमालयोऽद्रिः
१५५

सहस्रकाद्द्वादशकाच्चफूटा-
दूर्ध्वं समुच्चस्तृणमेखलश्च
सदा तुषाराऽऽवरणोऽभिरामो
हिमालयो मुख्यतमो महांश्च
१५६

सहस्रकाद्द्वादशकाच्चफूटा-
दूर्ध्वं हिमानीनिचयं प्रखण्डम्
परं पवित्रं नयनाऽभिरामं
सुखाऽऽस्पदं पर्यटनप्रियाणाम्
१५७

सहस्रकद्वादशफूटमान-
मल्पायनं नाम च खण्डमूर्ध्वम्
दिव्यौषधीरोहितशष्पपूर्णं
हिमालये गोचरभूमिखण्डम्
१५८

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नवाऽऽत्मसाहस्रिक-फूटमान-
मूर्ध्वं त्रिकोणाऽऽत्मकपत्रवन्यम्
सदा हरित्काननरम्यखण्डं
गुराँसखर्सूबुकिबाँझमुख्यम्
१५९

ऊर्ध्वं सहस्रात्मकपञ्चफूटा-
न्मधौ पतत्पत्रवनं च खण्डम्
साऽक्षोटचम्पाऽसनसल्लकञ्च
स्थानं परं स्वास्थ्यकरं प्रसिद्धम्
१६०

उष्णप्रदेशीयवनं च खण्ड-
मूर्ध्वं तराई-स्थलतो हरिच्च
सशाकशालाऽसनवेणुशष्पं
सव्याघ्रभल्लूकमृगादिपूर्णम्
१६१

भवेत् सुलभ्यं वहुमूल्यकाष्ठं,
संरक्षणं दुर्लभजीवजन्तोः,
औद्योगिकाऽऽवश्यकवस्तुलाभः
स्यादुर्वरा गोचरभूररण्यात्
१६२

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

काले सुवृष्टिः समतापमानं,
संरक्षणं भूस्खलनप्रकोपात्,
सदा जलाऽऽधारसुरक्षणञ्च,
वात्याऽऽवरोधोऽपि भवेदरण्यात्
१६३

संरक्षणं कीटविहङ्गमानां,
दिव्यौषधीमूलवनौषधीनाम्,
वन्यानिरोधो, जलवायुशुद्धि-
र्दृश्यं मनोहारि भवेदरण्यात्
१६४

महल्लघूपाद्रिहिमालयानां
क्रमे श्रिताः काममुपत्यकाश्च
काश्मीर-नेपाल-चितौन-दाङ
द्यौखूरि-देहादुन-पोखराद्याः
१६५

किञ्चित् समुच्चं च तराइभागा-
च्छैलेयमृत्-सैकत-शष्प-पूर्णम्
समाकुलं वन्यजजीवजातै-
स्तद् 'भावरं' नाम सुदीर्घखण्डम्
१६६

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लौहाऽभ्रताम्रं यशदञ्च नागं
स्वर्णं कुवाल्टं निकलं ग्रिफाइट्
मृत्तैलमङ्गारकजिप्समाऽऽलं
सम्प्राप्यते हैमगिरिप्रदेशे
१६७

हिमानिकास्रावनिसर्गमूलं
कठोरशैलेयतलीयमच्छम्
सरो यथा भैरव-दुग्ध-तीरी-
गोपाल-रारा-प्रभृति प्रसिद्धम्
१६८

हिमानिकासञ्चरणाऽवघर्षैः
शृङ्गाऽनुकल्पं शिखरं तथैव
दूनं गभीरं रचितं पुरेति
मतं हि भूतत्त्वविशारदानाम्
१६९

खम्बूगुलाचालमराङ्गरम्ता
नेपालदेशीयहिमाञ्चलीया
सदा सुनीरा सरितोद्गमा च
महामहिम्नी बृहती हिमानी
१७०

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उपत्यकारिफ्टसमीपशोभी
हिमालयोऽफ्रीकभुवः प्रखण्डे
कादम्बिनी-कौतुक-कान्त-कूटो
विशालकायो किलिमाञ्जरोऽस्ति
१७१

नूत्नाऽतिनूत्नाऽनुभवाऽभिपूर्त्यै
गवेषण-ज्ञान-हिते नृणां या
स्वाभाविकी प्राघुणिकी प्रवृत्ति-
र्ज्ञेया हि सा पर्यटनेति नाम्ना
१७२

स्वर्गीयमानन्दमभीप्समानः
समेतु काश्मीर-भुवं वरेण्याम्
मधूष्मवर्षाः परमोपयुक्ताः
परिभ्रमार्थं परिदर्शकानाम्
१७३

निरन्तरोन्निद्रहिमाद्रिमौलि-
रुपत्यका पुष्पफलैः समृद्धा
अहो !!! वितस्तोभयहर्म्यमाला
ज्योतिर्मयी श्रीनगरी चकास्ति
१७४

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सरोवरोद्यानजलोर्ध्वधारा-
विद्युद्द्युतिश्रेणीसमुल्लसन्तीम्
नौकाविहाराऽतिशयाऽभिरामां
सरस्तलश्यामलशाकवाटीम्

१७५

मनस्वलं बूलरकं डल-ञ्च
काश्मीर-भूभाग-तृतीयकांशि
सरोऽमलं स्वादु जलं तथैवाऽ
न्यत् तारकं कोशरनागक-ञ्च

१७६

निशात-शालीमर-चश्मशाही-
स्रोतांसि चोद्यानमभीक्षमाणः
वैदेशिकः प्राघुणिकः प्रकामं
निर्वृत्तिमासाद्य भवेच्च धन्यः

१७७

गुल्मोहराऽक्षोट-चुनार-वृक्ष-
च्छाया मधौ शान्ति-सुतुष्टिदा च
हरिन्मयं शाद्वलमास्तृत-ञ्च
शोभामनन्यां वितरत्यभीक्ष्णम्

१७८

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

काश्मीरिकी काष्ठकलाऽतिविख्या
काश्मीरशालो बहुमूल्यवांश्च
काश्मीरिकं केशरकं महार्घ्यं
द्राक्षाफलं सेवमतिप्रसिद्धम्
१७९

विहायसाशाः परिपूर्य भाभिः
समुद्रमासाद्य गिरिप्रतानैः
सदास्मितः शाश्वत ईश एव
विराजतेऽहर्निशमद्रिराजः
१८०

उद्धूमिताऽभ्राऽऽवलिको विभिन्नाऽऽ
कृतिस्वरूपाऽन्तरमादधानः
निदर्शयन् सृष्टिजनश्वरत्वं
विराजतेऽहर्निशमद्रिराजः
१८१

रूपान्तरं हैमगिरेरनेक-
मक्ष्णोः समन्तात्समुपैत्यभीक्ष्णम्
यथा चलच्चित्रनिदर्शकक्षे
प्रतिच्छविर्दृष्टिपथेऽभ्युपैति
१८२

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

केनाऽपि तीक्ष्णप्रतिभावतेदं
शश्वत् स्वरूपं परिवर्ति नूत्नम्
दृश्यं हृदाह्लादि सदाऽभिनन्द्यं
कलात्मकं प्रस्तुतमस्ति नूनम्

१८३

हिमालयाऽङ्कस्थविशालशान्त-
निशङ्कविश्रान्तसिताऽभ्रवृन्दम्
बहिष्कृतानां शरणार्थिकानां
शरण्य आवास इवाऽऽविभाति

१८४

यथर्तुवर्षाप्रहराऽभ्रभाभि-
रनेकरूपं दधतो हिमाद्रेः
दृश्यं प्रपश्यज्जनमानसे स्या-
देको बहुस्यामिति सम्प्रतीतिः

१८५

शैलाऽन्तरालाऽन्तगतं गभीरं
लताप्रतानोद्ग्रथितं च भीमम्
तीव्रप्रवाहाऽनुसरद्विलोलं
नौकायनं साहसिकाऽभियानम्

१८६

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्तर्महाव्योम विभेद्य चान्द्रं
लोकं समुत्तीर्य निवर्तनं च
नौकासहायेन महाब्धिपारं
यानं महासाहसिकाऽभियानम्
१८७

शून्यादधो यस्य च तापमानं
सदैव यस्मिन् तुहिनाऽऽक्तता च
सर्वोन्नतत्वं च महीध्रमालो
ध्रुवस्तृतीयो हि हिमालयोऽसौ
१८८

एको ध्रुवश्चोत्तरमेरुमूलोऽ
परो ध्रुवो दक्षिणमेरुमूलः
सदा हिमाऽऽच्छन्नतया हिमाद्रि-
र्ध्रुवस्तृतीयोऽभिमतो बुधैश्च
१८९

उपत्याकायाः समनिम्नभूमे-
र्नेदिष्ठमेवोच्चमतीवभव्यम्
रूपं महिष्ठं च विलोकमानो
निःसीममानन्दमुपैति लोकः
१९०

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नतोन्नतायाममहीध्रपृष्ठे
क्रमात्तिरो भूय समुद्भवंश्च
वृत्ताऽऽकृतिः सर्पगतिश्च मार्गो
विलीयतेऽन्ते गहनेऽतिदूरे
१९१

विहायसाऽऽशाघनमेघवृन्दे
विलीयमानं पुनरुद्भवंश्च
प्रस्तुत्य कौतूहलिकं च दृश्यं
विमानमन्तर्दधते सवेगम्
१९२

यानाऽन्तरै रङ्गमयैश्च काचैः
समन्ततो दृश्य-जगत्प्रपश्यन्
वैदेशिकः पर्यटको विशेषं
प्रकाममानन्दमुपैत्यजस्रम्
१९३

उद्भासितोत्तुङ्गहिमाद्रिशृङ्गै-
र्देवद्रुमैः स्वादुफलैः प्रसूनैः
सरःसरिन्निर्झरकैश्च धन्यं
हिमाञ्चलं "स्वर्ग" इवाऽभिनन्द्यम्
१९४

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्रमादधो विस्तृतशैलपृष्ठं
नानाप्रसूनप्रचयं प्रपश्यन्
तरत्-तरङ्गाऽनुसरद्-विलोलं
नौकायनं साऽतिसुखाऽऽवहञ्च
१९५

व्योमाऽम्बुभूसञ्चरजीवनानां
प्रजातयोऽसंख्यप्रकारिकाः स्युः
तथोद्भिदां स्थावरपादपानां
प्रजातयः सन्ति विभिन्नरूपाः
१९६

ब्रह्माण्डपर्यावरणीयदृष्टे-
र्हिमालयस्याऽतिविशिष्टताऽस्ति
अतिक्रमो यद्धि हिमालयस्य
दुर्भाग्यमामन्त्रयते प्रभूतम्
१९७

असावधानस्य जनस्य कार्य-
कलापतोऽयं रमणीयलोकः
धन्यः सरिन्निर्झरकाननैश्च
निर्जीवलोकत्वमुपैति किन्नु
१९८

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अव्याहता स्याद्धरणीतलीया
समस्तपर्यावरणव्यवस्था
वैविध्यवज्जैविकसम्पदा च
सर्वैः प्रयत्नेन सुरक्षणीया
१९९

भूमिर्हिमश्रीस्मितरागरम्या
नागाद्रिचन्द्राद्रिशिवाद्रिवृत्ता
श्रीवाग्वतीविष्णुमतीप्रसिक्ता
गुह्येश्वरी पाशुपती च धन्या
२००

श्रीलिच्छिवीमल्लनृपालभूमिः
शाहाऽवतंसाऽवनिपालभूमिः
स्वर्मस्तकोत्तुङ्गहिमाद्रिभूमिः
कलागुरोरारनिकस्यभूमिः
२०१

समुन्नतप्राक्तनशिल्पभूमिः
सुरक्षितप्रागितिहासभूमिः
अनादितोः धर्मसहिष्णुभूमि-
रुपत्यका कान्तिपुरी चकास्ति
२०२

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्तूपः स्वयम्भूर्हि विहङ्गदृष्टि-
र्विलोकयन् राजत एव दूरात्
सदैव सुश्यामलशान्तिभूमिः
पुरातनी कान्तिपुरी चकास्ति
२०३

हिमे प्रभाते गिरिशृङ्गतोऽधो
निम्नं समं विस्तृत-भूमिखण्डम्
कूहाऽऽवृतं क्षीरसमुद्रतुल्यं
दृश्यं समन्ताद् विलसत्यपूर्वम्
२०४

शैलेन्द्रशृङ्गस्थितमानवस्य
समन्ततो दृष्टिपथे विशाला
दिगन्तपर्यन्तवितानमाला
अनन्तशैलाऽऽवलयो लसन्ति
२०५

स्थानीयनानाजनजातिभाषा-
सङ्गीतनृत्याऽभिनयाऽभिनन्द्या
वैविध्यवत्संस्कृतिभिर्वरेण्या
गरीयसी भूमिरियं हि धन्या
२०६

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शैलेन्द्र-शोभा जनजातिगीत-
नृत्यं पुरातात्त्विकवास्तुशिल्पम्
प्रत्यब्दमाकर्षति दूरदेशाद्
गवेषकान् पर्यटकाननेकान्

२०७

यस्योत्तरस्यां गिरिराजमाला
तराइभूमिः खलु दक्षिणस्याम्
सीमा महाकालिनदी प्रतीच्यां
प्राच्यां हि मेची खलु राष्ट्रसीमा

२०८

यद् वाग्वतीशीतलनीरतीर-
निबद्धनिःश्रेणिपथाऽभिरम्यम्
प्रबुद्धलिङ्गात्मकपञ्चवक्त्रं
ज्योतिर्मयं मन्दिरमद्वितीयम्

२०९

प्रातः स्फुरत्स्वर्णिमरश्मिपुञ्ज-
प्रोद्भासितप्राक्तनवास्तुशिल्पम्
पुरो लसत्स्वर्णिमनन्दिवन्द्यं
ज्योतिर्मयं मन्दिरमद्वितीयम्

२१०

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कल्लोललीलोल्लसनीरतीरे
हर्म्यैः पुरातात्त्विकवास्तुशिल्पैः
समावृतं मध्यगतं विभाति
गुहचेश्वरीपीठमहो !!! प्रशस्यम्

२११

प्लवङ्गवैहङ्गमसङ्कुलाङ्गं
श्रीमत्किरातेश्वररङ्गमञ्चम्
श्लेष्मान्तकाऽरण्यगतान्तरङ्गं
गुहचेश्वरीपीठमहो !!! प्रशस्यम्

२१२

सौवर्णपीठं विवरं गभीरं
सौवर्णकान्तं कलशं पिधानम्
अभ्यर्चनं तन्त्रविधिप्रधानं
गुहचेश्वरीपीठमहो !!! प्रशस्यम्

२१३

आनन्दमूलाऽखिलसंस्कृतिर्वा
कला, विनाऽऽनन्दमलं हि जातैः
आनन्दलीनं खलु जीवनस्य
मुक्तिर्जनानां जनिमृत्युभावात्

२१४

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सौन्दर्यमानन्दमयं च सत्यं
सौन्दर्यमव्यक्तमनन्तमाद्यम्
सौन्दर्यमच्छं शुचि चिन्मयत्वं
सौन्दर्यमेकं हि विशुद्ध-ब्रह्म

२१५

शुभ्रा हिमानी हिममौलिमाला
शुभ्राऽमला राजमरालमाला
शुभ्रं समुद्भूमितमभ्रवृन्दं
सर्वत्र शुभ्रत्वमयी स्थलीयम्

२१६

शुभ्रा त्रियामा नवचन्द्रिकाश्रीः
शुभ्रा त्वरा निर्झरिणी, शिला च
शुभ्रश्चरन् मेषसमूहपूरः
सर्वत्र शुभ्रत्वमयी स्थलीयम्

२१७

श्रुतेः स्मृतेः प्रागितिहासभूमि-
र्ब्रह्मर्षिदेवर्षिमहर्षिभूमिः
सज्ज्ञानविज्ञानविचारभूमि-
र्हिमालयोऽध्यात्मसुचिन्त्यभूमिः

२१८

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अनन्तसौन्दर्यमनन्तभावं
निचेतुमेकत्र कदापि तेऽत्र
अनन्तवेलात्मकशब्दसिन्धुः
पर्याप्ततां नैति नगाऽधिराज !

२१९

स जयति धवलिमधामा शौर्य्यौदार्य-धैर्य्यधुर्य्यो देवः
तमसो मा ज्योतिरिति निर्दिशन् हिमालयो धन्यः

२२०

❋इति हिमाद्रि-महिमा❋

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वर्णानुक्रम श्लोक-तालिका

अ	श्लोक	पृष्ठ
अजस्र	८८	२३
अजाऽश्व	६८	१८
अत्यद्भुतं	२६	७
अदम्य	६	२
अधो हिमा	५४	१४
अनन्त सौन्दर्य	२१९	५६
अन्तर्महा	१८७	४८
अफ्गान	११५	३०
अल्टाइ	१३२	३४
अव्याहता	१९९	५१
असावधानस्य	१९८	५०
असौ महकाश	१	१
अस्त्यद्विराजे	८२	२१
अस्त्युत्तरस्यां	२७	८

आ	श्लोक	पृष्ठ
आनन्दमूला	२१४	५४
आषामदोर्जीलिङ	७०	१८
आषाममध्यो	१२२	३१
आस्टीन	१३३	३४
आहैमरेखं	६१	१६

उ	श्लोक	पृष्ठ
उद्भूमिता	१८१	४६
उद्भासितो	१९४	४९
उपत्यका पर्वत	५३	१४
उपत्यका भारत	६०	१६
उपत्यकायाःसम	१९०	४८
उपत्यकारिफट	१७१	४४
उष्ण प्रदेशीय	१६१	४१

ऊ	श्लोक	पृष्ठ
ऊर्ध्वं सहस्त्रात्म	१६०	४१

ए	श्लोक	पृष्ठ
एको ध्रुव	१८९	४८

औ	श्लोक	पृष्ठ
औदीच्य	१३४	३४

क	श्लोक	पृष्ठ
कल्लोल	२११	५४
कस्तूरिका	४२	११
कस्तूरिकामोद	४३	१२
कादम्बरी	७१	१९
कालिन्द	१०९	२८
काले सुवृष्टि	१६३	४२
काश्मीरिकी	१७९	४६
कास्पियनाऽब्धे	१२७	३३
किञ्चित्	१६६	४२
किंस्विद्	४५	१२
कुन्लून	१३१	३४
कूलूमसूरी	७९	२१
केनाऽपि	१८३	४७
कैलासशैला	११०	२८
क्रमादधो	१९५	५०

ख	श्लोक	पृष्ठ
खम्बू	१७०	४३
ख्यातं	१५१	३९

ग	श्लोक	पृष्ठ
गङ्गा गुहा	१०७	२८
गम्भीरता	३७	१०
गरीयसो	५१	१४
गाङ्गेयकै	११४	२९
ग्रीष्मे	४७	१३
गुराँसपुष्प	४४	१२
गुल्मोहरा	१७८	४५

घ	श्लोक	पृष्ठ
घोरेन्धकारे	३५	१०

छ	श्लोक	पृष्ठ
छटा	३१	९

ज	श्लोक	पृष्ठ
जान्सकर्हि	११८	३०
ज्योतिर्मयी	१४२	३६

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ट	श्लोक	पृष्ठ
टर्सिनियन्	१३६	३५

त	श्लोक	पृष्ठ
तथैव	१३७	३५
तथाप्यहो	८३	२२
तप्तायस	२२	६
तुङ्गः सगर्माथ	८९	२३
तुरस्ककृष्णा	१२६	३२
त्रिशूल	१०५	२७

द	श्लोक	पृष्ठ
दिव्योषधी	३९	११
दुर्जेय	८	३
दुरान्मनो	४१	११
दूरं विशाल	५६	१५
द्रावंसुसन्धान	७३	१९

ध	श्लोक	पृष्ठ
धृतिप्रसादो	१०	३

न	श्लोक	पृष्ठ
नतोन्नता	३३	९
नतोन्नताया	१९१	४९
नक्षा	१००	२६
नदीतटी	९९	२६
नद्यां सघोष	१७	५
नभःप्रसन्नं	३४	९
नवात्म	१५९	४१
नवारुणी	२१	६
नित्यं हिमानी	१४१	३६
निरन्तरो	१७४	४४
निरम्बुसान्द्रं	७२	१९
निशातशाली	१७७	४५
निशामये	२८	८
नूत्ना	१७२	४४
नेत्र्यं	५०	१३

प	श्लोक	पृष्ठ
पामीरपूर्वो	१३०	३३
पामीरपौर्वात्य	१२९	३३
पामीरविस्तार	११२	२९
पाश्चात्यका	१०१	२६
पुरा किल	३	१
प्रतीच्युदीच्यो	१२८	३३
प्रतीच्युदी	११६	३०
प्रतीच्युदीची	९०	२३
प्रत्यब्द	८४	२२
प्रवाह औन्नत्य	१४	४
प्रसन्नतां	९	३
प्राकारिका	१०२	२६
प्राचीनशैलेय	५२	१४
प्राच्युत्तरिया	१२१	३१
प्रातः	२१०	५३
प्रातारवे	९२	२४
प्राणान्	७८	२०
प्रायःसषटकोण	२४	७
प्लवङ्ग	२१२	५४
प्रोटिन्भिटामिन्	१४४	३७

फ	श्लोक	पृष्ठ
फाण्टं	६९	१८

ब	श्लोक	पृष्ठ
बन्धः सदा	१४६	३७
बन्धस्तु	१४७	३८
बृहत्समा	१०४	२७
ब्रह्माण्ड	१९७	५०

भ	श्लोक	पृष्ठ
भवेत्	१६२	४१
भीमे हिमागार	८१	२१
भूमण्डले	३२	९
भूमिर्हिमश्री	२००	५१
भूमौ मृदु	५७	१५
भौतिक्य	१४५	३७
भेत्तुं	११	४

म	श्लोक	पृष्ठ
मध्ये महा	९१	२४
मध्येऽन्नपूर्णा	९३	२४
मध्यैसिया	१११	२९
मध्यैसियासोल्लस	११३	२९
मनस्वलं	१७६	४५
महल्लघु	१६५	४२

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मानाजलप्सी	१३८	३५
मित्रैः सहाप्तै	७५	२०

य	श्लोक	पृष्ठ
यःकुम्भकर्ण	९६	२५
यथर्तु	१८५	४७
यद्वाग्वती	२०९	५३
यद्यप्यसाम्यं	१०३	२७
यन्मोहनाल	४६	१२
यल्लामटाँङ्गा	९८	२५
यस्योत्तरस्यां	२०८	५३
यानान्तरे	१९३	४९
या मानसुनी	१४०	३६
युगे हि	६७	१८

र	श्लोक	पृष्ठ
रसानुभूति	५	२
रूपान्तरं	१८२	४६
रोल्वालिङ्गो	९७	२५

ल	श्लोक	पृष्ठ
लौहाऽभ्र	१६७	४३

व	श्लोक	पृष्ठ
वर्षाऽवसाना	२९	८
विदेशिनां	८६	२२
विद्योतते	८०	२१
विभावसो	९५	२५
विभिन्नदेशी	७४	१९
विमुग्धता	५८	१५
विराजते	६३	१७
विशुद्धपर्या	१५२	३९
विशेषसंसाधन	७६	२०
विहायसाऽऽशाः	१८०	४६
विहायसा	१९२	४९
वेदः सदा	४०	११
व्योमाम्बु	१९६	५०

स	श्लोक	पृष्ठ
स जयति	२२०	५६
सत्यं शिवं	१९	६
सत्लूज	१४८	३८
सदाऽनवद्या	२०	६
सदा हिमश्री	१४९	३८
सदा हिमाच्छन्न	८५	२२
सन्ध्यासुलज्जा	२३	७
सन्देश	१०६	२७
समीरणा	७	३
समुल्लसे	१८	५
समुन्नत	२०२	५१
समेत्यतो	१२३	३२
सरित्प्रवाहस्य	१३	४
सरित्सरो	५९	१६
सरोवरोद्यान	१७५	४५
ससप्तकानां	१६	५
सहस्रकाद्	१५७	४०
सहस्रकाद्	१५५	४०
सहस्रकाद्	१५६	४०
सहस्रकाद्	१५४	३९
सहस्रकाद्	१५८	४०
साऽऽयास	७७	२०
सुदूरविस्तीर्ण	३८	१०
सुविस्तृतेयं	५५	१५
सुशोभते	६२	१६
सुसेचनं	१४३	३७
सेर्पा	६६	१७
सैवाद्रिमाल	१२४	३२
संङ्गीर्ण	१२०	३१
संरक्षणं	१६४	४२
स्तम्भो	१२	४
स्तूप	२०३	५२
स्थानीय	२०६	५२
स्वर्गीय	१७३	४४
स्वराष्ट्र	८७	२३
सौन्दर्य	२१५	५५
सौवर्णपीठं	२१३	५४

श	श्लोक	पृष्ठ
शनैः शनैरावरणं	३०	८
शनैः शनैः सम्परि	३६	१०
शनैः शनैः	१३५	३५
शिवत्व	२५	७
शिवालिक	१५३	३९
शुभ्रा हिमानी	२१६	५५
शुभ्रा त्रियाम	२१७	५५
शृङ्गं करा	११७	३०

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शून्यादधो	१८८	४८
शैलान्तरा	१८६	४७
शैलेन्द्र शृङ्ग	२०५	५२
शैलेन्द्र-शोभा	२०७	५३
शैलाधिराज	१५	५
श्रमी	६५	१७
श्रीचन्द्रमौले	१०८	२८
श्रीशैलाजा	२	१
श्रीमुक्तिनारायण	९३	२४
श्रीलिच्छिवी	२०१	५१
श्रुति	४	२
श्रुतेः	२१८	५५
श्रेणीकराकोरम	११९	३१

ह	श्लोक	पृष्ठ
हरिन्मणि	४९	१३
हिन्दूकुशा	१२५	३२
हिमानिका	६४	१७
हिमानिकासञ्चरणा	१६९	४३
हिमानिकास्राव	१६८	४३
हिमालयस्य	१५०	३८
हिमालयाऽङ्स्य	१८४	४७
हिमे प्रभाते	२०४	५२
हिरण्मयं	४८	१३
हिस्पार	१३९	३६

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



Jayatu Sanskritam, Kathmandu, Nepal